# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-२ (SEM-4) | **प्रश्नपत्रम् – १** | गुणाः - ७० |
| विषयः – अनिवार्यसंस्कृतम् | **CF-2.4.4** | समयः - ३ तः ६ |
| दिनाङ्कः – १६/४/२०१६ | सन्दर्भग्रन्थः – अभिज्ञानशाकुन्तलम् | |

---

**प्रथमान्वितिः -१**

**प्रश्नः -१ द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।

(२) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनामुक्तं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति भुवि ॥

(३) कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैलैः स्रोतः स्रोतोवहां यथा ॥

**प्रश्नः -२** ०८

'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तले'ति वाक्यं समीक्ष्यताम् ।

अथवा

अभिज्ञानशाकुन्तलमभिलक्ष्य सप्रमाणम् "उपमा कालिदासस्ये'तिवाक्यं विविच्यताम् ।

**प्रश्नः -३ टिप्पणीद्वयं लिखत ।** ०४

(१) कण्वाश्रमवर्णनम् ।

(२) द्वितीयाङ्कस्य सारांशः ।

(३) "शमप्रधानेषु तपोवनेषु" इत्यस्य भावार्थः ।

(४) अष्टमूर्तिवर्णनम् ।

**प्रश्नः - ४ पञ्चप्रश्ना एकवाक्येन समाधेयाः ।** ०५

(१) अभिज्ञानशाकुन्तलनाटकस्य प्रारम्भिकप्रयोगकालः कः ?

(२) विदुषकस्य नाम किम् ?

(३) शकुन्तलायाः द्वयोः सख्योर्नाम किम् ?

(४) कण्वः कुत्र गतः ?

(५) शकुन्तलायाः पितरौ कौ ?

(६) शाकुन्तलस्य उपजीव्यं किम् ?

(७) शाकुन्तले कति अङ्काः ?

**द्वितीयान्वितिः - २**

**प्रश्नः -५ द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ॥

(२) वृथैव सङ्कल्पशतैरजस्रम् अनङ्ग नीतोसि मयातिवृद्धिम् ।
आकृष्य चापं श्रवणोपकण्ठे मय्येव युक्तस्तव बाणमोक्षः ॥

(३) पिपासाक्षामकण्ठेन याचितश्चाम्बु पक्षिणा ।
नवमेघोज्झिता चास्य धारा निपतिता मुखे ॥

प्रश्नः -६ चतुर्थाङ्कस्य सारांशो लेख्यः ।
अथवा ०८
शकुन्तलासंयोगवर्णनं कर्त्तव्यम् ।

प्रश्नः -७ **एका टिप्पणी लेख्या ।** ०२

(१) मुञ्चन्ति अश्रु इव लताः । (२) सेयं याति शकुन्तआ पतिगृहम् ।

प्रश्नः -८ **द्वौ प्रश्नौ एकवाक्येन समाधेयौ ।** ०२

(१) कण्वाश्रमः कस्याः नद्याः तीरे वर्तते ?

(२) "अवेहि तनयां ब्रह्मन्नग्निगर्भा शमीमिव" इति वाक्यं कस्य मुखात् निःसृतम् ?

(३) दुर्वासाः कस्मिन् अङ्के शापं ददाति ?

**तृतीयान्वितिः - ३**

प्रश्नः -९ **द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) यूयमेव प्रमाणं जानीथ धर्मस्थितिश्च लोकस्य ।
लज्जाविनिर्जिता जानन्ति न किमपि महिलाः ॥

(२) साक्षात् प्रियामुपगतापहाय पूर्वं चित्रार्पितामहमिमां बहुमन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य जातः सखे प्रणयवान् मृगतृष्णिकायाम् ॥

(३) एवमाश्रमविरुद्धवृत्तिना संयमी किमिति जन्मदस्त्वया ।
सत्त्वसंश्रयगुणोपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः ॥

**चतुर्थान्वितिः - ४**

प्रश्नः -१० षष्ठाङ्कस्य सारांशः लेख्यः ।
अथवा ०८
दुष्यन्तस्य प्रथमं पुत्रमेलनं वर्णयत ।

प्रश्नः -११ **टिप्पणीद्वयं लिखत ।** ०४

(१) सर्वदमनस्य बाल्यम् ।

(२) मातलिप्रसङ्गः ।

(३) दुष्यन्तस्य प्रत्याख्यानम्

(४) भरतवाक्यम् ।

प्रश्नः -१२ **पञ्चप्रश्ना एकवाक्येन समाधेयाः ।** ०५

(१) भरतस्य अपरं नाम किम् ?

(२) कस्याः नद्याः स्रोतसि शकुन्तलायाः अङ्गुलीयकं परिभ्रष्टम् ?

(३) दुष्यन्तस्य व्यपदेशः कः ?

(४) रक्षाकाण्डकः कुत्र बद्धः आसीत् ।

(५) दुष्यन्तः सर्वदमनं कस्य आश्रमे दृष्टवान् ।

(६) दुष्यन्तः कं पराजयितुं मातलिना प्रार्थितः ?

(७) मातलिः कस्य सारथिः ?

***